श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अहोबिलनारसिंहस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अहोबिलनारसिंहस्तोत्रम् ॥

लक्ष्मीकटाक्षसरसीरुहराजहंसं
पक्षीन्द्रशैलभवनं भवनाशमीशम्।
गोक्षीरसार घनसारपटीरवर्णं
वन्दे कृपानिधिमहोबलनारसिंहम् ॥ 1 ॥

आद्यन्तशून्यमजमव्ययमप्रमेयं
आदित्यचन्द्रशिखिलोचनमादिदेवम्।
अब्जामुखाब्जमदलोलुपमत्तभृङ्गं
वन्दे कृपानिधिमहोबलनारसिंहम् ॥ 2 ॥

कोटीरकोटिघटितोज्ज्वलकान्तिकान्तं
केयूरहारमणिकुण्डलमण्डिताङ्गम्।
चूडाग्ररञ्जितसुधाकरपूर्णबिम्बं
वन्दे कृपानिधिमहोबलनारसिंहम् ॥ 3 ॥

वाराहवामननृसिंहसुभाग्यमीशं
क्रीडाविलोलहृदयं विबुधेन्द्रवन्द्यम्।
हंसात्मकं परमहंसमनोविहारं
वन्दे कृपानिधिमहोबलनारसिंहम् ॥ 4 ॥

मन्दाकिनीजननहेतुपदारविन्दं
वृन्दारकालयविनोदनमुज्ज्वलाङ्गम्।
मन्दारपुष्पतुलसीरचिताङ्घ्रिपद्मं
वन्दे कृपानिधिमहोबलनारसिंहम् ॥ 5 ॥

तारुण्यकृष्णतुलसीदलधामरम्यं
धात्रीरमाभिरमणं महनीयरूपम्।
मन्त्राधिराजमथदानवमानभङ्गं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ 6॥

॥ इति श्री अहोबिलनारसिंहस्तोत्रं समाप्तम्॥